# Maravijaya Stotram

# मारविजयस्तोत्रम्

## Document Information

Text title : Maravijaya Stotram

File name : mAravijayastotram.itx

Category : misc, buddha, stotra

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods,

Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# मारविजयस्तोत्रम्

जितमारकलिं जगदेकगुरुं सुरयक्षमहोरगदैत्यनतम् ।
चतुसत्यसुदेशितमार्गमिमं गुणमेघमहं प्रणमामि सदा ॥ १॥

भवभीममहोदधिमध्यगतं कृपणार्तरवं समवेक्ष्य जनम् ।
परिमोचयितुं य इह प्रणिधिं प्रचकार विभुं तमहं प्रणतः ॥ २॥

गिरिराजनिभं शरदिन्दुधियं सुमुखं सुभुजं वररूपधरम् ।
सुगतं गतमप्रतिमं सुगतं प्रणतोऽस्मि सदा जगदर्थकरम् ॥ ३॥

कनकप्रभया परिपीततनुं वरदुन्दुभितोयदवल्गुरुतम् ।
गजहंसविलम्बितधीरगतं शिरसाऽभिनतोऽस्मि गुणैकनिधिम् ॥ ४॥

तरुणार्कसमैरचलैर्नयनैः स्फुरदुग्रमहाशनिभीमरवैः ।
नमुचिप्रहरैरसिशक्तिधरैश्चलितोऽसि विभो न हि त्वं विकृतैः ॥ ५॥

लवलीफलपाण्डुरकर्णपुटाः कुचभारविनामितगात्रलताः ।
नहि त्वामशकन् खलु नागसुताः श्वसितैः स्खलितैरपि कम्पयितुम् ॥ ६॥

तरवः कुसुमस्तबकाभरणा बहुरत्नसहस्रचिताश्च नगाः ।
न तथाभिरतिं जनयन्ति सतां जनयन्ति यथा तव वीरगुणाः ॥ ७॥

स्फुटचित्रपदं बहुयुक्तियुतं गमकं वचनं तव कर्णसुखम् ।
शुभमार्गफलं प्रसमीक्ष्यजना न गृणन्ति पुनस्त्वदृतेऽन्यवचः ॥ ८॥

इति वः शरणं समवेक्ष्य जना न पतन्त्यपि कल्पशतैर्निरये ।
विनिहत्य च दोषरिपून् बहुलान् परियन्ति शुभं वरमोक्षपुरम् ॥ ९॥

तव सौम्यतयाऽप्यभिभूततमो न विराजति शीतकरो गगने ।
तव काञ्चनकुङ्कुमसप्रभया प्रभयाऽभिहतो न विभाति रविः ॥ १०॥

तव नाथ शुभे वदनाम्बुरूहे नयनभ्रमरा निपतन्ति नृणाम् ।
प्रतिबुद्धदले कमले विमले भ्रमरा इव पुष्पशताकुलिताः ॥ ११॥

इति तोटकमन्त्रवरैरतुलैः परिकीर्त्य मया तव वर्णलवान् ।
यदुपार्जितमद्य शुभं विपुलं शिवमस्तु ततो भुवि देवनृणाम् ॥ १२॥

इति श्रीमारविजयस्तोत्रं सम्पूर्णम् ॥

*Maravijaya Stotram*
pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*